# संस्कृत वार्ता:

दिनाङ्क : 16/04/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् नीतिनिर्माणे नारीशक्तेः समुचितं नेतृत्व-प्रदानं वर्तमानकालस्य आवश्यकता अस्ति।
- भारत-ऑस्ट्रिया-देशयोः मध्ये व्यापार-निवेशयोः सम्वर्धनार्थं प्रधानमन्त्रिणा नवदिल्याम् आस्ट्रिया-देशस्य चान्सलर डॉ. क्रिश्चियन स्टॉकर इत्यनेन सह प्रतिनिधिस्तरीया वार्ताकृता।
- गृह-सूचीकरणस्य, गृह-गणनायाः च कृते सप्तविंशत्यधिक द्विसहस्रतम वर्षस्य जनगणनायाः प्रथमः चरणः बहुविधराज्येषु केन्द्रशासितप्रदेशेषु च आरब्धः।
- आन्ध्रप्रदेशस्य कुर्नूल-मण्डले अद्य प्रातः मार्गदुर्घटनायां अष्ट जनाः मृताः, अन्ये च अनेके व्रणिताः।
- आई.पी.एल. क्रिकेट क्रीडायाम् अद्य मुम्बईय्याः वानखेड़े क्रीडाङ्गणे, मुंबई-इंडियंस-दलं पंजाब-किंग्स-दलं सम्मुखी करिष्यति।

---

<u>प्रधानमन्त्री-नारीशक्ति:</u>

प्रधानमन्त्री नरेन्द्रमोदी अवधानं प्रदत्तवान्, यत् देशस्य पञ्चाशत् प्रतिशतं यावत् जनसङ्ख्या निर्णयक प्रक्रियायाः भागः भवेत् । सः अवदत् यत्, नारीशक्तिः देशस्य विकासे महत्त्वपूर्णां भूमिकां निर्वहति, तथा च नीतिनिर्धारणे ताभ्यः समुचितं नेतृत्व-प्रदानं वर्तमानकालस्य आवश्यकता अस्ति।

श्रीमोदी अद्य लोकसभायां नारीशक्ति-वन्दन्-अधिनियमेत्यस्य संविधान-संशोधन-सम्बद्धानां त्रयाणां प्रमुखानां विधेयकाणां विषये चर्चाविधौ इदम् उक्तवान्। संविधानः (एकत्रिंशोत्तरैकशत संशोधन) विधेयकम् विंशति षड्विंशति, परिसीमन विधेयकम्, विंशति षड्विंशति, तथा च

केन्द्र-शासित-विधिः (संशोधन) विधेयकम्, विंशति षड्विंशति, इति त्रयः विधेयकाः सन्ति। सः अवदत् यत्, ये अधुना अस्य विधेयकस्य विरोधं करिष्यन्ति ते भविष्ये परिणामान् सम्मुखी करिष्यन्ति।

चर्चायां भागं स्वीकृत्य समाजवादीति-दलस्य सांसदः अखिलेशः यादवः अवदत् यत् तस्य दलं महिलानाम् आरक्षणस्य समर्थनं करोति। परञ्च सः एतादृशं महत्त्वपूर्णं विधानं शीघ्रतायाम् आनेतुं प्रश्नं पृष्टवान्। सः अवदत् यत् नूतनस्य जनगणना-अभियानस्य समाप्तेः अनन्तरं एव महिला-आरक्षण-विधेयकं प्रवर्तनीयम्। तेलुगु-देशम्-दलस्य नेत्रि डा. बाय रेड्डी शबरी इत्येषा अवदत् यत् अद्यत्वे महिलाः मूलस्तरात् राष्ट्रियस्तरं यावत् राष्ट्रस्य नेतृत्वं कर्तुं सज्जाः सन्ति। शासनक्षेत्रे महिलानां सहभागित्वं वर्धयितुं उद्दिष्टम् एतत् महत्त्वपूर्णं विधेयकम् आनेतुं सा प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति धन्यवादं प्रकटितवती। केन्द्रीय-विधि-न्याय-मन्त्री अर्जुन-मेघवालः अद्य लोकसभायां संविधानस्य (एकत्रिंशोत्तरैकशततमं संशोधन) विधेयकं परिसीमन-विधेयकं च स्थापितवान्। गृहमन्त्री अमितशाहः लोकसभायां केन्द्र-शासित-क्षेत्र-विधि-(संशोधन) विधेयकं स्थापितवान्। विधेयकं उपस्थापयन् विधि-न्याय-मन्त्री अर्जुनराम मेघवालः उक्तवान् यत् अयं दिवसः ऐतिहासिकः, सर्वकारः महिलानां राजनैतिक-न्यायार्थं कार्यं कुर्वन् अस्ति। डॉ. बी. आर. अम्बेडकर-वर्यस्य उद्धरणं प्रकटयन् मेघवाल: अवधानं दत्तवान् यत् समुदायस्य प्रगतिः महिलानां प्रगत्या एव माप्यते। चर्चाविधौ, काङ्ग्रेस दलस्य सांसदः गौरव गोगोईः अवदत् यत् तस्य दलं महिला-आरक्षण विधेयकस्य पक्षे अस्ति, परन्तु एतस्य सरलीकरणं भवेत्, परिसीमनेन सह सम्बद्धः न भवेत्। सः अवदत् यत् लोकसभायां विद्यमानानां त्रिचत्वारिंशदधिक पञ्चशतासनानाम् आधारेण आरक्षणं भवेत्।

---

## राज्यसभा: - नारीशक्ति

राज्यसभायां भाजपेति दलस्य सदस्या मेधा कुलकर्णी इत्येषा अवदत् यत् एतत् नूतनस्य संसदः कृते ऐतिहासिकं क्षणम् अस्ति, यतः महिला-आरक्षण-विधेयकं भारतस्य विकासे महिलानां शक्तिं सुनिश्चितं करोति। सा प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति धन्यवादं प्रकटयन्ती अवोचत् यत् सम्पूर्णः देशः, महिलाः च तं समर्थयन्ति।

संसदभवन-परिसरात् बहिः प्रसारमाध्यमैः सह वार्तालापं कुर्वन्ती भाजपेति दलस्य सांसदः संध्या रे इत्येषा उक्तवती यत् देशे महिलानां सशक्तीकरणाय एषः ऐतिहासिकः दिवसः अस्ति।

------------------------------------------------

भाजपा-जगदम्बिका

भाजपेति दलस्य सदस्यः जगदम्बिका पालः अवदत् यत् भारतं लोकतन्त्रस्य जननी अस्ति, तथा च तस्यां लोकतन्त्रस्य जनन्यां ऊनविंशत्यधिक द्विसहस्रतमे वर्षे लोकसभानिर्वाचने महिलानां प्रतिनिधित्वं त्रयस्त्रिंशत् प्रतिशतं यावत् भविष्यति। आकाशवाण्या सह वार्तालापं कुर्वन्, श्रीपालः आरोपितवान् यत् परिसीमन-विधेयकस्य विषये विपक्षि दलानि देशं भ्रामयन्ति, तेन अग्रे उक्तं यत् परिसीमन-आयोगस्य निर्माणं भविष्यति तत् च राज्यानामानुसारं भविष्यति।

------------------------------------------------

प्रधानमंत्री-ऑस्ट्रिया-चांसलर

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्याम् ऑस्ट्रिया-देशस्य चान्सलर् डा. क्रिश्चियन् स्टॉकर इत्यनेन सह वार्तालापः कृतः। उपवेशने भारत-आस्ट्रिया-देशौ खाद्यसुरक्षायां, सहकारे सैन्यविषये च आशयपत्रम्, भयोत्पादनविरोधे, संयुक्तकार्यसमूहस्य विषये च अनेकेषां सन्धि पत्राणां च आदानप्रदानं कृतवन्तौ। संयुक्त-वार्ताहरसम्मेलनं सम्बोधयन् प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् भारतम् आस्ट्रिया च मूलसौकर्ये, नवीनतायां, सुस्थिरतायां च विश्वसनीय-सहभागिनौ स्तः। श्रीमोदी इत्यपि अवदत् यत् चांसलर-महोदयस्य यात्रया उभयोः देशयोः मध्ये व्यापारः निवेशः च प्रवर्धिताः भविष्यन्ति।

प्रधानमन्त्री श्रीमोदी अवदत् यत् भारतं, स्वस्य गत्या, परिमाणेन च सह आस्ट्रिया-देशस्य विशेषज्ञैः सह मिलित्वा विश्वस्य कृते विश्वसनीयं तन्त्रज्ञानं सुनिश्चितं करिष्यति। आस्ट्रिया-देशस्य चान्सलर् डा. क्रिश्चियन् स्टॉकर वर्यः तस्य भारतयात्रां आस्ट्रिया-भारत-सम्बन्धानां कृते महत्त्वपूर्णम् इति वर्णितवान्। सः अवदत् यत् आस्ट्रिया-भारत-देशयोः राजनैतिक-सम्बन्धाः अधुना इतोपि सुदृढाः अभवन्।

---------------------------------------------------

**जनगणनायाः प्रथमः चरणः**

गृह-सूचीकरणस्य, गृह-गणनायाः च कृते सप्तविंशत्यधिक द्विसहस्रतम वर्षस्य जनगणनायाः प्रथमः चरणः बहुविधराज्येषु केन्द्रशासितप्रदेशेषु च आरब्धः।

---------------------------------------------------

**आन्ध्रप्रदेश मार्गदुर्घटनायां**

आन्ध्रप्रदेशस्य कुर्नूल-मण्डले अद्य प्रातः मार्गदुर्घटनायां अष्ट जनाः मृताः, अन्ये च अनेके व्रणिताः। राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः, प्रधानमन्त्री नरेन्द्रमोदी च मृतकान् प्रति शोकं प्रकटितवन्तः।

---------------------------------------------------

**ओम-बिडला-परमाणु ऊर्जा**

लोकसभायाम् अद्य भारतस्य परमाणु-ऊर्जा-कार्यक्रमः, स्वदेशीरूपेण परिकल्पितं, निर्मितं च तमिळुनाडु-राज्यस्य कलपक्कम्-नगरस्य प्रोटोटाईप-फ़ास्ट-ब्रीडर-रिएक्टर इति महत्त्वपूर्णतां प्राप्नोत् इति प्रशंसितम्। लोकसभायाः अध्यक्षः ओम बिरला-वर्यः अवदत् यत् भारतस्य वैज्ञानिक-प्रगति-प्रक्रियायां, प्रौद्योगिकीय-स्वावलंबन-प्रक्रियायां च एषा महती उपलब्धिः अस्ति। लोकसभायाः अध्यक्षः अवदत् यत्, एतत् ऐतिहासिकं सोपानं परमाणु-ऊर्जा-अभियानं गतिं प्रदत्तं तथा च सप्तत्यधिक द्विसहस्रतमवर्ष पर्यन्तं शुद्ध-शून्य-उत्सर्जनं प्राप्तुं भारतस्य वैश्विकप्रतिबद्धतां सुदृढम् अकरोत् ।

---------------------------------------------------

**आई. पी. एल.**

आई.पी.एल. क्रिकेट क्रीडायाम् अद्य मुम्बईय्याः वानखेड़े क्रीडाङ्गणे, सायं सार्द्ध सप्तवादने मुंबई-इंडियंस-दलं पंजाब-किंग्स-दलं सम्मुखी करिष्यति।

।। इति वार्ता: ।।